**PURANETIHASA**

**ACHARYA 1st YEAR**
**Course/Paper.3**

**PART – A**

# श्रीमद्रामायणम् (सुन्दरकाण्डे 1-20 सर्गाः)

**Śrīmadrāmāyaṇam (Sundarakāṇḍē 1-20 sargāḥ)**


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# श्रीमद्रामायणम्

## सुन्दरकाण्डम् (1to 20 Chapters)

## (स्वाध्ययनसामग्री)

रामायणं भगवतः रामचन्द्रस्य जीवनचरितमाधारीकृत्य वाल्मीकिमहर्षिणा विरचितमस्ति । अत्र सप्तकाण्डानि तथा चतुर्विंशतिसहस्रश्लोकाः सन्ति । -यथा रामायणे सप्तकाण्डानि ,किस्किन्ध्याकाण्डम् ,अरण्यकाण्डम्,अयोध्याकाण्डम्,बालकाण्डम् ,सुन्दरकाण्डम् रामायणञ्च आदिकाव्यम् । रम्या रामायणी ,उत्तरकाण्डञ्चेति । वाल्मीकिः आदिकविः,युद्धकाण्डम् कथा । इयं कथा चिरकालादेव जनानां मनसि स्वतन्त्रं स्थानमधिकरोति । अस्याः सरसकथायाः सर्वदा सर्वथा च विश्ववासिभिः आस्वाद्यते । समाजशिक्षायै अस्याः गुरुत्वपूर्णा भूमिका विद्यते मधुरता । महाभारतमतिरिच्य एतादृशं विशालं महाकाव्यं विश्वसाहित्ये नोपलभ्यते । महाकाव्येस्मिन् मालिनीप्रभृतीनि -पुष्पिताग्रा-वंशस्थ-मुख्यतया यद्यपि अनुष्टुप् छन्दसः व्यवहारः कृतः तथापि उपजाति ,किस्किन्ध्या ,दण्डकारण्यं ,मध्यभारतं ,छन्दांसि अपि अत्र व्यवहृतानि सन्ति । अत्र उत्तरभारतं लङ्कानगरी च वर्णितास्ति । अतः रामायणे वर्णिताः घटनाः न केवलमयोध्यायां सीमिताः अपि तु लादिस्थानानां तथा च उत्तरभारतस्य सम्पूर्णे भारतवर्षे विक्षिप्ताः विराजन्ते । महाकाव्येस्मिन् मिथि समुद्रान्तर्वर्तिन्याः लङ्कायाश्च आधिपत्यं वर्णितमस्ति । ,दक्षिणभारतस्य किस्किन्ध्यायाः ,राज्यानां -मलय-महेन्द्र-बिन्ध्य-चित्रकूट-बिन्ध्याचलतः गोदावरीं यावत् परिव्याप्तानां दण्डकारण्य -कुशी-सरयू-यमुना-तथा हि गङ्गा ,ना उपन्यस्तंमाल्यवन्तादिपर्वतानां महद्वर्णनं यथा कवि -सारस-हंस ,वराहप्रभृतिमृगाणां-भल्लुक-सिंह-व्याघ्र ,विभिन्नशैलप्रस्रवणानां ,गोदावरीप्रभृतीनां नदीनां -अशोक-चम्पक-कदम्ब-अर्जुन-अश्वत्थ-शाल ,मयूरप्रभृतिपक्षिणां-शुक-गृध्र-काक-चक्रवाक-क्रौञ्च वसन्तादीनां ऋतूनां -शीत-हेमन्त-शरत्-वर्षा-ग्रीष्म ,नां फलानांजम्बुप्रमुखा-आमलक-पनस-आम्र

सौन्दर्यमयं सरसं वर्णनं समुपस्थापितं यत्तु पाठाकानां हृदयकन्दरे अपूर्वमानन्दं जनयति । अपि चात्र -अन्तःपुररमणी-जनपदवासि-नर्तक-गायक-सङ्गीतज्ञ-शिल्पि-याजक-योद्धृ-ऋषि-राज नीतिवर्णनं विधाय भारतवर्षस्य वैशिष्ट्यं -रीति-संस्कार-रआचा-वनवासिशवरीप्रभृतीनां धर्म सांस्कृतिकविभवजालञ्च महर्षिवाल्मीकिना सम्यगुपस्थापितम् । अतः अद्यापि ग्रामे ग्रामे नगरे नगरे समग्रभारतवर्षे विश्वस्मिन् विश्वेपि रम्या रामायणी कथेति प्रचारिता प्रसारिता च वर्तते । अध्यायाः आलोचिताः 20 दृशस्य रामायणमहाकाव्यस्य सुन्दरकाण्डस्य आदितःप्रस्तुतपाठ्यक्रमे एता सन्ति । अतः परीक्षार्थिनां सौविध्यार्थं ते विंशतिः अध्यायाः चतुरंशेषु विभाजिताः सन्ति ।

# प्रथमोंशः

## —प्रस्थावना

मुख्यतया श्रीरामदूतस्य हनुमतः श्रीमद्रामायणस्य सुन्दरकाण्डस्यास्मिन् प्रथमांशे हनुमता सुरसातिक्रमणं ,मैनाकपर्वतसम्बादः-समुद्रलङ्घनवृत्तान्तः वर्णितोस्ति । तदन्तरे अत्र हनुमत् सिंहिकाविदारणञ्च वर्णितमस्ति । अन्ततः हनुमान् लङ्काबहिष्ठलम्बशिखरं प्राप्तवान् । अग्रे हनुमता जिता । तदनु चन्द्रोदयकाले लङ्कायां प्रविशन् हनुमान् महाराक्षसी नारीरूपधारिणी लङ्किनी परा वाद्यमाननानावादित्रादि श्रृण्वन् अनेकविधायुधधारिमूलं विलोकयन्श्चान्तःपुरमाविवेश ।

## -- उद्देश्यम्

प्रियपाठकाः सुन्दरकाण्डस्य प्रस्तुतपाठे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

**समुद्रलङ्घनोपक्रमः । हनुमतः** .1

**मैनाकपर्वतसम्बादः ।-हनुमत्** .2

**हनुमता सुरसातिक्रमणम् ।** .3

**हनुमता सिंहिकाविदारणम् ।** .4

**हनुमता महाराक्षसी नारीरूपधारिणी लङ्किनी पराजिता ।** .5

## – हनुमतः समुद्रलङ्घनोपक्रमः

ष्टुं सीतायाः अन्वेषणे लङ्कापुरीं सः सीतां द्र -श्रीरामचन्द्रस्य सेवकः हनुमान् निश्चितवान् यत्

लम्फदानं कृतवान् । गमिष्यति । ततः सः महेन्द्रपर्वतमारुह्य सर्वान् देवान् नमस्कृत्य समुद्रलंङ्घनाय

ततः कपिकुञ्जरः हनुमान् आकाशमार्गे समुद्रस्य उपरि वायुवेगेन चलति । एतत् दुष्करं कार्यं दृष्ट्वा

चारणाश्च हनुमतः प्रशंसां कृतवन्तः । समुद्रलङ्घनसमये एवं लगति महर्षि ,आकाशचारिणः गन्धर्वाः

हनुमान् तरङ्गमालाभिः सह समग्रसमुद्रं पिवतीव । समुद्रलङ्घनवेलायां हनुमान् -यत्

छायाश्वेतमेघपंक्तिरिव शोभते स्म । हनुमान् वारम्बारं मेघानां समुद्रे निलीयते पुनः प्रकाशते स्म । तदा

सूर्यः अपि न तपते । एवं वायुदेवोऽपि तस्य सेवां करोति स्म । ऋषयः मुनयः देवाः रामकार्यार्थं तं

गन्धर्वाः हनुमतः स्तुतिं कुर्वन्ति स्म । नागयक्षगणाः अपि हनुमतः स्तुतिं कुर्वन्ति स्म ।

**– बोधप्रश्नः**

निश्चितवान् । श्रीरामचन्द्रस्य सेवकः हनुमान् सीतायाः अन्वेषणे कां पुरीं प्रति गन्तुं .1

हनुमान् कं पर्वतमारुह्य समुद्रलङ्घनाय लम्फदानं कृतवान् । .2

**– मैनाकपर्वतसम्बादः-हनुमत्**

यतो हि रामकार्यसिद्ध्यर्थं हनुमान् समुद्रलङ्घनं करोति स्म ततः समुद्रः तस्य सम्मानं

हे शैलप्रवर -कर्तुमिष्टवान् । समुद्रः सुवर्णमयं गिरिश्रेष्ठं मैनाकम् उक्तवान् यत्!एषः हनुमान्

मयि समुद्रे सुरक्षितवान् रामकार्यार्थी एवं हनुमतः पिता पवनदेवः त्वां मैनाकं वायुवेगेन आनीय । अतः

हे मैनाक!एतस्य हनुमतः अस्माभिः सत्कारः करणीय एव ।

समुद्रस्य वचनं श्रुत्वा सुवर्णमयः मैनाकपर्वतः लवणसमुद्रजलेभ्यः उपरि उत्थितः अभूत् । महासागरस्य जलं नीत्वा सः पर्वतः बहुलतया ऊर्ध्वं प्रति उत्थितः अभूत् । अल्पक्षणेन एव सः शालकायः पर्वतः हनुमन्तं तस्य शिखरं दर्शितवान् । तस्य शिखरः सुवर्णमय आसीत् । तत्र वि किन्नराः नागाश्च चरन्ति स्म । पर्वतस्य सुवर्णमयशिखरवशात् आकाशः स्वर्णप्रभया उद्भासितः अभूत् -उक्तवान् । सुवर्णमयशिखरयुक्तः सः मैनाकः पर्वतः सूर्य इव देदीप्यते स्म । तदनु मैनाकः हनुमन्तम् भवान् दुष्करकार्यं करोति । अतः मम शिखरस्योपरि सुखपूर्वकतया किञ्चित् विश्रम्य !हे वानरशिरोमणि समुद्रः !तदनु अवशिष्टयात्रां सम्पादयतु । रामचन्द्रस्य पूर्वजाः समुद्रं वर्द्धितवन्तः । अतः हे हनुमान् सम्मानं स्वीकरोतु । तेन स्वतः समुद्रस्य अपि भवतः सत्कारं कर्त्तुमिच्छति । अतः भवान् समुद्रस्य भवतः पिता पवनदेवः मम साहाय्यं कृतवान् आसीत् !हे कपिवर -सम्मानं भविष्यति । मैनाकः कथयति । अतः अहमपि तव अभ्यर्थनां कर्त्तुमिच्छामि । भवान् पवनपुत्रः अस्ति । तव सत्कारेण पवनदेवस्य अपि सत्कारः भविष्यति ।

यति हे कपिवरमैनाकः कथ!मम शिखरे किञ्चित् विश्राम्यतां तदनु गमिष्यति । मम शिखरे सुगन्धितानि सुस्वादुकन्दमूलानि फलानि जलानि च सन्ति । तेषाम् उपभोगानाम् आस्वादनं कृत्वा न् स्वस्थतामनुभूय तदनु अवशिष्टां यात्रां सम्पादयतु । मैनाकस्य वचनं श्रुत्वा कपिश्रेष्ठः हनुमान् उक्तवा हे पर्वतोत्तम मैनाक -यत्!त्वया सह मिलित्वा ममापि प्रसन्नता भवति । तव सत्कारवचनेन एव मम आतिथ्यमभूत् । इदानीमहं रामकार्यार्थी अस्मि । बहूनि दुष्कराणि कार्याणि साधनीयानि सन्ति । पि विश्रामं न कुत्रा -दिनानि च गच्छन्ति । वानराणां समक्षे मया वचनं दत्तं यत् ,समयः अल्पः एव स्वीकरिष्यामि इति । एवमुक्त्वा वानरशिरोमणिः हनुमान् मैनाकं स्वस्य दक्षिणहस्तेन स्पृष्ट्वा आकाशमार्गे अग्रे गतवान् । तदा मैनाकः एवं समुद्रः अपि परमादरेण हनुमन्तं दृष्ट्वा यथोचिताशीर्वादेन तस्य अभिनन्दनं कृतवन्तौ ।

--- **बोधप्रश्नः**

न मैनाकपर्वतः स्वशिखरं हनुमन्तं दर्शितवान् । कस्य आदेशे .1

मैनाकपर्वतस्य शिखरदेशः कीदृशः आसीत् । .2

**– हनुमता सुरसातिक्रमणम्**

हनुमतः बलपरीक्षणाय वरदानपूर्वकं देवैः प्रेषिता राक्षसीरूपधारिणी नागमाता सुरसा मुखं व्यादाय हनुमन्तं निगलितुमिच्छति स्म । तदा हनुमान् सहसा सूक्ष्मरूपमादाय तन्मुखे प्रविश्य भवान् !उक्तवती हे कपिश्रेष्ठ राहुमुक्तमिव सुरसामुखात् निष्क्रान्तं हनुमन्तं दृष्ट्वा सुरसादेवी बहिरागतः । एवं विदेहनन्दिनीं सीतां श्रीरामेण सह मेलयतु । हनुमतः ,श्रीरामस्य कार्यसिद्ध्यर्थं सुखपूर्वकतया गच्छतु एतत् तृतीयं सुदुष्करं कार्यं दृष्ट्वा सर्वे प्राणिनः साधु साधु इति हनुमन्तं प्रशंसितवन्तः । तदनु हनुमान् ग्रे धावितः अभूत् । गरुडवेगेन आकाशमार्गे अ

**– हनुमता सिंहिकाविदारणम्**

सुरसामतिक्रम्य हनुमान् गरुडवेगेन आकाशमार्गे अग्रे धावितः अभूत् । एवम्प्रकारेण आकाशमार्गे गछन्तं हनुमन्तम् इछाधारिणी विशालकाया सिंहिका नामिका राक्षसी दृष्टवती ।सिंहिका षः विशालः जीवः मम वशे आगतः अस्ति । एनं खादिष्यामि चेत् चिन्तितवती बहुकालादनन्तरमे बहुदिनं यावत् मम उदरं पूर्णं स्थास्यति । सा राक्षसी सिंहिका एवं चिन्तयित्वा हनुमतः छायां निगृहीतवती । सिंहिकया हनुमतः छाया गृहीता इति हनुमतः प्रबलपराक्रमः पङ्गुः अभूत् । हनुमान् अभूत् । किं कारणमिति विचिन्तयन् सः समुद्रस्य जलोपरि एकं विशालकायं पुनः अग्रे गन्तुं असमर्थः प्राणिनम् दृष्टवान् । तं विकरालां राक्षसीं दृष्ट्वा पवनकुमारः हनुमान् अचिन्तयत् यत् एषः एव सा णभरेण छायाग्राहिणी सिंहिका अस्ति एव । तदा बुद्धिमान् कपिवरः हनुमान् स्वशरीरं वर्द्धितवान् एवं क्ष

सः विशालकायः अभूत् । तं महाकपिं वर्द्धितं दृष्ट्वा सिंहिकापि पातालात् आकाशं प्रति तस्य मुखं व्यावृतवती । एवं मुखं व्यावृत्य हनुमन्तं ग्रसितुं सिंहिका धावितवती । तदा हनुमान् स्वशरीरं संकुञ्चितं रागतः । दैवानुग्रहतः स्वाभाविकबुध्या कृत्वा सिंहिकायाः मुखे प्रविश्य तस्य मर्मस्थानं छित्वा बहि कौशलेन च हनुमान् तां राक्षसीं सिंहिकां मारयित्वा पुनः प्रचण्डवेगेन आकाशमार्गे अग्रेसरः ,धर्येण अभूत् । एवम्प्रकारेण क्रमशः बहुविघ्नान् अतिक्रम्य बुद्धिमान् पराक्रमशाली कपिश्रेष्ठः हनुमान् अन्ततो प्तवान् ।गत्वा लङ्कापुरीं प्रा

--- **बोधप्रश्नः**

हनुमतः बलपरीक्षणाय देवैः का प्रेषिता । .1

का सा इच्छाधारिणी विशालकाया राक्षसी । .2

**हनुमता महाराक्षसी नारीरूपधारिणी लङ्किनी पराजिता**

निशि लङ्कायां प्रविशन्तं हनुमन्तं लङ्काभिमानिनी महाराक्षसी लङ्किनी प्रत्यक्षीभूय पाणितलेनाभिहत्य निवारितवती । अथो नारीति हनुमता वामहस्तेन मन्दं ताडितापि सा विह्वला भूत्वा इति हनुमन्तं ब्रह्मदेवस्य मूर्छिताभूत् । ततः हनुमता पराजिता लङ्किनी लङ्काविनाशकालः सम्प्राप्तः वचनमुक्त्वा पुरप्रवेशमन्वजानात् ।

## सारांशः

सः सीतां द्रष्टुं सीतायाः अन्वेषणे लङ्कापुरीं गमिष्यति -श्रीरामचन्द्रस्य सेवकः हनुमान् निश्चितवान् यत् न् । यतो हि लम्फदानं कृतवा । ततः सः महेन्द्रपर्वतमारुह्य सर्वान् देवान् नमस्कृत्य समुद्रलंङ्घनाय

रामकार्यसिद्ध्यर्थं हनुमान् समुद्रलङ्घनं करोति ततः समुद्रः तस्य सम्मानं कर्तुमिष्टवान् । समुद्रस्य वचनं श्रुत्वा सुवर्णमयः मैनाकपर्वतः लवणसमुद्रजलेभ्यः उपरि उत्थितः अभूत् । तदनु मैनाकः हनुमन्तम् ति । अतः मम शिखरस्योपरि सुखपूर्वकतया भवान् दुष्करकार्यं करो !हे वानरशिरोमणि -उक्तवान् किञ्चित् विश्रम्य तदनु अवशिष्टयात्रां सम्पादयतु । मैनाकस्य वचनं श्रुत्वा कपिश्रेष्ठः हनुमान् उक्तवान् हे पर्वतोत्तम मैनाक -यत्!त्वया सह मिलित्वा ममापि प्रसन्नता भवति । तव सत्कारवचनेन एव मम आतिथ्यमभूत् रामकार्यार्थी अस्मि । इदानीमहं । बहूनि दुष्कराणि कार्याणि साधनीयानि सन्ति । कुत्रापि विश्रामं न -दिनानि च गच्छन्ति । वानराणां समक्षे मया वचनं दत्तं यत् ,समयः अल्पः एव स्वीकरिष्यामि इति । एवमुक्त्वा वानरशिरोमणिः हनुमान् मैनाकं स्वहस्तेन स्पृष्ट्वा आकाशमार्गे अग्रे तवान् । तदा मैनाकः एवं समुद्रः अपि परमादरेण हनुमन्तं दृष्ट्वा यथोचिताशीर्वादेन तस्य अभिनन्दनं ग कृतवन्तौ । हनुमतः बलपरीक्षणाय वरदानपूर्वकं देवैः प्रेषिता राक्षसीरूपधारिणी नागमाता सुरसा रूपमादाय तन्मुखे प्रविश्य मुखं व्यादाय हनुमन्तं निगलितुमिच्छति स्म । तदा हनुमान् सहसा सूक्ष्म बहिरागतः । तदनु अग्रे मार्गमध्ये राक्षसी सिंहिका हनुमतः छायां निगृहीतवती । सिंहिकया हनुमतः छाया गृहीता इति हनुमतः प्रबलपराक्रमः पङ्गुः अभूत् । हनुमान् पुनः अग्रे गन्तुं असमर्थः अभूत् । किं एकं विशालकायं प्राणिनम् दृष्टवान् । तं विकरालां कारणमिति विचिन्तयन् सः समुद्रस्य जलोपरि राक्षसीं दृष्ट्वा पवनकुमारः हनुमान् अचिन्तयत् यत् एषः एव सा छायाग्राहिणी सिंहिका अस्ति एव । तदा बुद्धिमान् कपिवरः हनुमान् स्वशरीरं वर्द्धितवान् एवं क्षणभरेण सः विशालकायः अभूत् । तं महाकपिं सिंहिकापि पातालात् आकाशं प्रति तस्य मुखं व्यावृतवती । एवं मुखं व्यावृत्य हनुमन्तं वर्द्धितं दृष्ट्वा ग्रसितुं सिंहिका धावितवती । तदा हनुमान् स्वशरीरं संकुञ्चितं कृत्वा सिंहिकायाः मुखे प्रविश्य तस्य हनुमान् तां राक्षसीं कौशलेन च ,मर्मस्थानं छित्वा बहिरागतः । दैवानुग्रहतः स्वाभाविकबुद्ध्या धर्येण सिंहिकां मारयित्वा पुनः प्रचण्डवेगेन आकाशमार्गे अग्रेसरः अभूत् । एवम्प्रकारेण क्रमशः बहुविघ्नान् अतिक्रम्य बुद्धिमान् पराक्रमशाली कपिश्रेष्ठः हनुमान् अन्ततो गत्वा लङ्कापुरीं प्राप्तवान् । निशि लङ्कायां महाराक्षसी लङ्किनी प्रत्यक्षीभूय पाणितलेनाभिहत्य निवारितवती । प्रविशन्तं हनुमन्तं लङ्काभिमानिनी

अथो नारीति हनुमता वामहस्तेन मन्दं ताडितापि सा विह्वला भूत्वा मूर्छिताभूत् ।ततः हनुमता पराजिता लङ्किनी लङ्काविनाशकालः सम्प्राप्तः इति हनुमन्तं ब्रह्मदेवस्य वचनमुक्त्वा लङ्कापुरीप्रवेशनाय मर्पितवती ।अनुमति

### आदर्शप्रश्नाः

**—लघुत्तरीयप्रश्नाः**

हनुमतः समुद्रलङ्घनोपक्रममाविष्कुरुत । .1

मैनाकपर्वतस्य वर्णनं कुरुत । .2

हनुमतः लङ्कनीविजयवृत्तान्तं वर्णयत । .3

**—विश्लेषणात्मकप्रश्नाः**

हनुमतः कृते मैनाकपर्वतस्य आतिथ्यार्पणमाविष्कुरुत । रामदूतस्य .1

ता सुरसातिक्रमणमाविष्कुरुत ।हनुम .2

**—निबन्धात्मकप्रश्नाः**

हनुमतः समुद्रलङ्घनमुद्दिश्य लिखत । रामदूतस्य .1

हनुमतः सिंहिकाविदारणमुद्दिश्य लिखत । .2

**—एकाङ्कप्रश्नाः**

लङ्कानगरी कस्यां दिशि भवति स्म । .1

रामदूतः नाम कः । .2

हनुमान् कस्य देवस्य पुत्रः । .3

मातुः नाम किम् । हनुमतः .4

नागमाता इति का । .5

मैनाकपर्वतः कुत्र लुक्कायितः आसीत् । .6

कस्य भयात् मैनाकपर्वतः लुक्कायितः आसीत् । .7

छायाग्रहिणी राक्षसी का । .8

हनुमतः बलपरीक्षणाय देवैः का प्रेषिता आसीत् । .9

। हनुमान् केन हस्तेन मैनाकपर्वतस्य शिखरदेशं स्पृष्टवान् .10

हनुमान् केन हस्तेन लङ्किनीं ताडितवान् । . .11

लङ्कायाः दुर्दशाविषये कस्य भविष्यवाणी आसीत् । .12

**— उत्तराणि**

सिंहिका .8 इन्द्रदेवस्य भयात् .7 समुद्रमध्ये .6 सुरसा .5 अञ्जना .4 पवनदेवस्य .3 हनुमान् .2 दक्षिणदिशि .1

ब्रह्मदेवस्य .12 स्तेनवामह .11 दक्षिणहस्तेन .10 नागमाता सुरसा .9

# द्वितीयोंशः

**—प्रस्थावना**

श्रीमद्रामायणस्य सुन्दरकाण्डस्यास्मिन् द्वितीयांशे मुख्यतया श्रीरामदूतस्य हनुमतः लङ्कापुरीप्रवेशनपुरःसरं रावणस्य भवने अन्तःपुरे पुष्पकविमाने च सीतायाः अन्वेषणं वर्णितमस्ति । हीमन्विष्य अत्र प्रथमतः हनुमान् लङ्कालङ्करणभूतं रावणनिवासमेत्य तदन्तिकस्थप्रहस्थादिभवनेषु वैदे रावणगृहं प्राविशत् । तदनु प्रसङ्गवशात् रावणभवनं तत्रस्थं पुष्पकविमानञ्च कविर्वर्णयति । तदनु कविः पुष्पकविमानं पुनः विस्तरशः वर्णयति । तदन्तरे तत्र हनुमान् रावणभवने सीतामन्विष्यन् मान् तत्र नानालङ्करणोपशोभितं पुष्पकविमानमारुह्य अनेकावस्थापन्नप्रसुप्तनारीगणान् विलोकयति । हनु विभिन्नोपकरणशयनोत्तमशायिनं बहुविधाभरणविभूषितवपुषं रावणं दृष्टवान् । तदविदूरतः पणवमृदङ्गवेणुवीणाढक्कादिभिरुद्यतालिङ्गितवपुषां सुप्त्यनवस्थाप्रत्यङ्गनां वराङ्गनानां मध्ये यं सीतेति मत्वा सञ्जातहर्षः हनुमान् अद्भूतशयनशायिनीं उज्ज्वलाभरणोपशोभितां मन्दोदरीं दृष्ट्वा से पुच्छचुम्बनादि कापेयमाविश्चकार ।

**-- उद्देश्यम्**

प्रियपाठकाः सुन्दरकाण्डस्य प्रस्तुतपाठे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

**रावणभवनस्य वर्णनम् । अत्यन्तशोभासम्पन्नस्य .1**

**पुष्पकविमानस्य विस्तरशः वर्णनम् । .2**

**हनुमान् रावणभवने सीतामन्विष्यन् पुष्पकविमानमारुह्य अनेकावस्थापन्नप्रसुप्तनारीगणान् .3**

**विलोकयति ।**

**सुप्त्यनवस्थाप्रत्यङ्गनां वराङ्गनानां मध्ये अद्भुतशयनशायिनीं उज्वलाभरणोपशोभितां मन्दोदरीं दृष्ट्वा .4**

**सेयं सीतेति मत्वा हनुमान् हर्षितोभूत् ।**

**रावणभवनस्य वर्णनम् अत्यन्तशोभासम्पन्नस्य**

बलवान् वीरः हनुमान् रत्नखचितं स्वर्णनिर्मितं पक्षिगणयुतं सुशोभितं भवनसमुदायं दृष्टवान् । तेषु भवनेषु हनुमान् चापशालाः तत्र उपवेशनशालाः आयुधशालाः त्र विभिन्नानि रत्नखचितानि सुशोभितानि भवनानि दृष्टवान् । चन्द्रशालाश्च दृष्टवान् । कपिवरः हनुमान् त येषां भवनानां प्रशंसनं देवाः असुराश्च कुर्वन्ति स्म । तानि भवनानि सम्पूर्णतया दोषरहितानि आसन् एवञ्च रावणः तानि भवनानि स्वपुरुषार्थेन प्राप्तवान् आसीत् । तानि भवनानि बहुप्रयत्नेन निर्मितानि लगति यत् साक्षात् मयदानवेन एतानि अद्भुतानि भवनानि निर्मितानि सन्ति । तानि आसन् । एवं भवनानि भूतलोपरि सर्वगुणसंपन्नानि आसन् । तदनु हनुमान् राक्षसराजस्य रावणस्य अत्यन्तम् अनुपमं भवनं दृष्टवान् । तदेव रावणभवनमत्यन्तं शोभाढ्यं सुवर्णयुतं मनोहरञ्चासीत् । त्नखचितं विभिन्नोपकरणभूषणभूषितं नानालङ्करणलक्षितं पुष्पपरागसुरभिभरितं तद्भवनमनेकानेकर साक्षात् इन्द्रभवनमिव शोभते स्म ।

– **बोधप्रश्नः**

रात्रौ रावणभवनं कः दृष्टवान् .1?

इन्द्रभवनमिव कस्य भवनमासीत् .2?

**पुष्पकविमानस्य विस्तरशः वर्णनम् ।**

तदनु हनुमान् राक्षसराजस्य रावणस्य अत्यन्तम् अनुपमं भवनं नाम पुष्पकविमानं दृष्टवान् । तदेव पुष्पकविमानं मेघसमानतया अत्यन्तं सुवर्णयुतं मनोहरञ्च आसीत् । तद् विमानं स्म । अनेकानेकरत्नखचितं विभिन्नफलवृक्षान्वितं पुष्पकपरागभरितं साक्षात् पर्वतशिखरमिव शोभते

तस्मिन् विमाने श्वेतभवनानि निर्मितानि आसन् । तत्र सुन्दरपुष्पसुशोभितानि बहूनि पुष्कराणि आसन् । तत्र कोमलयुतस्य विचित्रवनस्य अद्भूतसरोवरस्य च निर्माणं कृतमासीत् । हनुमान् यत् इतस्ततः भ्रमति स्म । सुन्दरं विमानं तत्र दृष्टवान् तस्य नाम पुष्पकविमानम् इति आसीत् । तत् विमानं देवानां गृहकार्येषु उत्तमविमानेषु च पुष्पकविमानस्य एव सर्वश्रेष्ठता सर्वमान्यता च स्वीक्रियते स्म । सुवर्णनिर्मितानि पुष्पाणि च शोभन्ते स्म । तत् ,तस्मिन् पुष्पकविमाने रत्ननिर्मिताः पक्षिणः तथा अश्वाः नुसृत्य बहुशीघ्रतया मनोवेगेन चलति स्म । तस्मिन् विमाने पुष्पकविमानं स्वामिनः मनोनुसारम् अ आश्चर्यजनकानि विचित्रवस्तूनि एकत्रितानि आसन् । बहुशालायुक्तं तद् विमानम् अत्यन्तं शोभते स्म । तद् विमानं शरत्कालीनचन्द्र इव निर्मलं तथा मनसि आनन्दप्रदायकमासीत् । सहस्त्रभूतगणाः तस्य स्म । तत् पुष्पकविमानं वसन्तकालिकं पुष्पकुञ्जमिव रमणीयमासीत् । विमानस्य भारं वहन्ति एतादृशम् अत्यन्तम् अद्भुतं रमणीयं पुष्पकविमानं वानरशिरोमणिः हनुमान् दृष्टवान् ।

**--- बोधप्रश्नः**

राक्षसराजस्य रावणस्य अत्यन्तानुपमविमानस्य नाम किमासीत् .1?

पमविमानस्य भारं के वहन्ति स्मराक्षसराजस्य रावणस्य अत्यन्तानु .2 ?

**हनुमान् रावणभवने सीतामन्विष्यन् पुष्पकविमानमारुह्य अनेकावस्थापन्नप्रसुप्तनारीगणान्**

**विलोकयति ।**

ततः सीतामन्विष्यन् हनुमान् राक्षसराजस्य रावणस्य अतीच्छाविषयीभूतां मणिसोपानविकृतां हेमजालविराजितां अत्यन्तरुचिरां रमणीयां परमैश्वर्यशोभासम्पन्नां शालां दृष्टवान् । तत्र हनुमान् ङ्गनाः अवलोकितवान् । ताः आस्तीर्णकुथायां विचित्रवस्त्राभरणभूषिताः रतिश्रमश्रान्ताः शयानाः वरा वराङ्गनाः पानद्रववशगाः रतिक्रीडाक्रान्ताः विभिन्नावस्थापन्नाः दृश्यन्ते स्म । तासां वदनानि क्षपाक्षये दिवसे प्रफुटितानि पद्मानीव भूत्वा रात्रौ पुनः संवृतपत्राणि पद्मानीव दृश्यन्ते स्म । ताभिः स्त्रीभिः परिवेष्टितः उडुपतिरिव शोभते स्म । पानद्रववशगासु परिवृतः सः रावणः नक्षत्रादिभिः रतिक्रीडाक्रान्तासु विभिन्नावस्थापन्नासु तासु काश्चन वराङ्गनाः व्यावृततिलकाः काश्चित् उद्भ्रान्तनूपुराः गलितहाराश्च दृश्यन्ते स्म । तासां शर्करासवगन्धः वदननिश्वासः समन्ततः सौरभयति सर्वान् । रावणे क्तमनसाः ताः वरस्त्रियः परस्परं समालिङ्ग्य शयानाः आसन् । एवं परस्परं संसक्ताः अत्यन्तास कुसुमोच्चयाः अन्योन्यभ्रमरैः आकुलं वसन्ते मासि लतानां वनमिव रावणस्य तद्भवनं राराजते स्म ।

--- **बोधप्रश्नः**

वराङ्गनाभिः परिवृतः रावणः कथं शोभते स्म । .1

**वराङ्गनानां मध्ये अद्भुतशयनशायिनीं उज्ज्वलाभरणोपशोभितां मन्दोदरीं दृष्ट्वा सुप्त्यनवस्थाप्रत्यङ्गनां**

**सेयं सीतेति मत्वा हनुमान् हर्षितोभूत् ।**

हनुमान् प्रसुप्तरावणस्य समीपे आस्तीर्णकुथायां विचित्रवस्त्राभरणभूषिताः रतिश्रमश्रान्ताः शयानाः पानद्रववशगाः रतिक्रीडाक्रान्ताः विभिन्नावस्थापन्नाः वराङ्गनाः अवलोकितवान् । ताः वराङ्गनाः

दृश्यन्ते स्म । तासां शर्करासवगन्धः वदननिश्वासः समन्ततः सौरभयति सर्वान् । रावणे अत्यन्तासक्तमनसाः ताः वरस्त्रियः परस्परं समालिङ्ग्य शयानाः आसन् । एवं परस्परं संसक्ताः वसन्ते मासि लतानां वनमिव रावणस्य तद्भवनं राराजते स्म । कुसुमोच्चयाः अन्योन्यभ्रमरैः आकुलं ताभिः स्त्रीभिः परिवृतः सः रावणः नक्षत्रादिभिः परिवेष्टितः उडुपतिरिव शोभते स्म । तदा तत्र सुप्त्यनवस्थाप्रत्यङ्गनां वराङ्गनानां मध्ये अद्भुतशयनशायिनीं उज्ज्वलाभरणोपशोभितां मन्दोदरीं दृष्ट्वा सेयं मत्वा हनुमान् हर्षितोभूत् । सीतेति

**--- बोधप्रश्नः**

सुप्त्यनवस्थाप्रत्यङ्गनां वराङ्गनानां मध्ये अद्भुतशयनशायिनीं उज्ज्वलाभरणोपशोभितां कां दृष्ट्वा सेयं .1

सीतेति मत्वा हनुमान् हर्षितोभूत् ?

## सारांशः

श्रीमद्रामायणस्य सुन्दरकाण्डस्यास्मिन् द्वितीयपाठ्यांशे मुख्यतया श्रीरामदूतस्य हनुमतः लङ्कापुरीप्रवेशनपुरःसरं रावणस्य भवने अन्तःपुरे पुष्पकविमाने च सीतायाः अन्वेषणं वर्णितमस्ति । दनु परमैश्वर्यसम्पन्नस्य अत्र विशेषतया अत्यन्तशोभासम्पन्नस्य रावणभवनस्य वर्णनं विहितमस्ति । त पुष्पकविमानस्य विस्तरशः वर्णनमत्र उपलभ्यते । तदनु हनुमान् कथं रावणभवने सीतामन्विष्यन् पुष्पकविमानमारुह्य अनेकावस्थापन्नप्रसुप्तनारीगणान् विलोकयतीति वर्ण्यते । तदन्तरे

लाभरणोपशोभितां मन्दोदरीं दृष्ट्वा सेयं सुप्त्यनवस्थाप्रत्यङ्गनां वराङ्गनानां मध्ये अद्भुतशयनशायिनीं उज्ज्व सीतेति मत्वा हनुमान्  हर्षितोभूदिति एते विषयाः अस्मिन् द्वितीयपाठ्यांशे सारांशत्वेन चर्चिताः सन्ति ।

## आदर्शप्रश्नाः

**—लघुत्तरीयप्रश्नाः**

सूक्ष्मरूपेण रावणभवने हनुमतः विचरणमुद्दिश्य लिखत । .1

तस्य चन्द्रस्येव रावणस्य शोभामाविष्कुरुत ।नक्षत्रादिभिः परिवेष्टि .2

मन्दोदर्यः अनतिरां शोभां वर्णयत । .3

**—विश्लेषणात्मकप्रश्नाः**

रावणभवनस्य वैभवं वर्णयत । .1

लङ्कानगरवैशिष्ट्यं स्पष्टयत । .2

**—निबन्धात्मकप्रश्नाः**

पुष्पकविमानस्य सौन्दर्यातिशय्यं विवृणुत । .1

अनेकावस्थापन्नप्रसुप्तनारीगणानां चित्रणं कुरुत । रावणभवने .2

**—एकाङ्कप्रश्नाः**

मारुतिः इति कः .1?

स्वेच्छानुसारं रूपं धारयितुं कः समर्थः आसीत् .2?

वरस्त्रीभिः परिवेष्टितः उडुपतिरिव कः शोभते स्म .3?

क्षपा इति शब्दस्य कोऽर्थः .4?

संस्कृतभाषायां पञ्चानां वाद्ययन्त्राणां नामानि लिखत .5?

मद्यपानेन किं भवति .6?

रावणस्य पत्न्याः नाम किम् .7?

रावणस्य भ्रातुः नाम किम् .8?

रावणः कस्मात् देवात् वरं प्राप्तवान् .9?

पानद्रववशगाः शयानाः काः आसन् .10?

काः आसन् रावणभवने अनेकावस्थापन्नाः शयानाः .11?

पुष्पकविमानं के चालयन्ति स्म .12?

**— उत्तराणि**

मन्दोदरी .7 निशासक्तता .6 ढक्का,वंशी,वीणा,मृदङ्गः,पणवः .5 रात्रिः .4 रावणः .3 हनुमान् .2 हनुमान् .1

भूतगणाः .12 वराङ्गनाः .11 रावणस्य वराङ्गनाः .10 ब्रह्मदेवात् .9 विभीषणः .8

# तृतीयोंशः

## —प्रस्थावना

श्रीमद्रामायणस्य सुन्दरकाण्डस्यास्मिन् तृतीयपाठ्यांशे मुख्यतया श्रीरामदूतः हनुमान् कथं रावणस्यान्तःपुरे रात्रौ सूक्ष्मरूपेण प्रविश्य तत्रस्थासु पानद्रववशगासु रतिक्रीडाक्रान्तासु तदनु तत्र मन्दोदर्यामागतां सीताबुद्धित्वं अनेकावस्थापन्नप्रसुप्तवराङ्गनासु अन्विष्य सीतां न प्राप्य युक्तिपर्यालोचनेन निवर्तयन् परदारदर्शनदुरितं विशङ्क्यापि आत्मनः जितेन्द्रियत्वात् तन्निराकृत्य तत्रालब्धसीताशुद्धिरिति विज्ञाय अन्यत्रसीतान्वेषणाय मतिं करोतीति वर्णितमस्ति । सीता रावणेन मारिता वेति विशङ्क्य हनुमान् ,पि सीतां न प्राप्यचित्रगृहनिकुञ्जदिनानास्थानेषु अन्विष्या विषीदति । स्वयत्नवैफल्यं मन्वानः सुग्रीवदर्शनादिषु निर्विर्णोपि निर्वेदस्यानर्थापादकत्वं विचिन्त्य अनिर्वेदस्यैव फलोत्पादकत्वमिति निश्चित्य पुनरपि सीतान्वेषणमारभते । पुष्पकविमानात् निवृत्य न् विद्युद्वेगेन सर्वत्रान्विष्यापि सीतां न दृष्ट्वा तस्याः विनाशमेव हेतुत्वेन उत्प्रेक्षते । सीतायाः हनुमा अनुपलब्धिः रामे निवेदितानिवेदितापि अनेकमहानर्थापादिकेति विचिन्त्य प्रतिप्रयाणात् निवृत्तः तावत् अशोकवनिकां दृष्ट्वा तत्रैव प्रायोपवेशनं प्राणमोक्षणं रावणमारणं वेति यावत् हनुमान् चिन्तयति सीता अन्वेषणीया इति निश्चिनोति । अशोकवनिकाप्राकारमवप्लुत्य वनरामणीयकं पश्यन् वृक्षाद्वृक्षमवप्लुत्य शाखाधुननेन पुष्पपर्णादीनि शातयन् सीतां विचिन्वानः हनुमान् मध्येवनं क्षं ददर्श । तत्र समीपे वहन्तीं सरितां दृष्ट्वा काञ्चनवेदिकामध्यवर्तिकाञ्चनवृक्षपरिवृतं कञ्चिच्छिंशुपावृ सन्ध्यावन्दनाय अवश्यमत्र सीता आगमिष्यतीति सम्भावयन् हनुमान् तस्मिन् शिंशुपावृक्षान्तराले लुक्कायितोतिष्ठत् । शिंशुपाग्रेवस्थाय सर्वतः दृष्टिं प्रसारयन् हनुमान् चैत्यप्रासादगतां विलोक्य युक्तैर्बहुभिर्हेतुभिस्तस्याः सीतात्वं निर्धारयति स्म । यथावर्णितगुणावस्थोपलक्षितां तां

-- उद्देश्यम्

प्रियपाठकाः सुन्दरकाण्डस्य प्रस्तुतपाठे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।

**सीताबुद्धित्वं अनेकावस्थापन्नप्रसुप्तवराङ्गनासु अन्विष्य सीतां न प्राप्य तदनु तत्र मन्दोदर्यामागतां .1**

**युक्तिपर्यालोचनेन हनुमान् निराकृतवान् ।**

**सीता रावणेन मारिता वेति विशङ्क्य ,चित्रगृहनिकुञ्जादिनानास्थानेषु अन्विष्यापि सीतां न प्राप्य .2**

**हनुमान् विषीदति । स्वयत्नवैफल्यं मन्वानः सुग्रीवदर्शनादिषु निर्विण्णोऽपि निर्वेदस्यानर्थोपादकत्वं**

**विचिन्त्य अनिर्वेदस्यैव फलोत्पादकत्वमिति निश्चित्य पुनरपि सीतान्वेषणमारभते ।**

**पुष्पकविमानात् निवृत्य हनुमान् विद्युद्वेगेन सर्वत्रान्विष्यापि सीतां न दृष्ट्वा तस्याः विनाशमेव हेतुत्वेन .3**

**कमहानर्थोपादिकेति विचिन्त्यउत्प्रेक्षते । सीतायाः अनुपलब्धिः रामे निवेदितानिवेदितापि अने**

**प्रतिप्रयाणात् निवृत्तः प्रायोपवेशनं प्राणमोक्षणं रावणमारणं वेति किमुचितमिति तर्कयति कपिवरः ।**

**अशोकवनिकायाः शोभावैभवम् । .4**

**चैत्यप्रासादगतां यथावर्णितगुणावस्थोपलक्षितामेकां नारीं विलोक्य युक्तैर्बहुभिर्हेतुभिस्तस्याः सीतात्वं.5**

**हनुमान् निर्धारितवान् ।**

**अनेकावस्थापन्नप्रसुप्तवराङ्गनासु अन्विष्य सीतां न प्राप्य तदनु तत्र मन्दोदर्यामागतां सीताबुद्धित्वं युक्तिपर्यालोचनेन हनुमान् निराकृतवान् ।**

तत्रस्थासु पानद्रववशगासु श्रीरामदूतः हनुमान् रावणस्यान्तःपुरे रात्रौ सूक्ष्मरूपेण प्रविश्य रतिक्रीडाक्रान्तासु अनेकावस्थापन्नप्रसुप्तवराङ्गनासु अन्विष्य सीतां न प्राप्य तदनु तत्र मन्दोदर्यामागतां सीताबुद्धित्वं युक्तिपर्यालोचनेन निवर्तयन् परदारदर्शनदुरितं विशङ्क्यापि आत्मनः जितेन्द्रियत्वात् तन्निराकृत्य ह्रिरिति विज्ञाय अन्यत्रसीतान्वेषणाय मतिं करोतीति अत्र वर्ण्यते ।तत्रालब्धसीताशु

**--- बोधप्रश्नः**

कस्यां हनुमतः सीताबुद्धित्वमागता .1?

**सीता रावणेन मारिता वेति विशङ्क्य ,चित्रगृहनिकुञ्जादिनानास्थानेषु अन्विष्यापि सीतां न प्राप्य स्वयत्नवैफल्यं मन्वानः सुग्रीवदर्शनादिषु निर्विण्णोपि निर्वेदस्यानर्थापादकत्वं हनुमान् विषीदति । विचिन्त्य अनिर्वेदस्यैव फलोत्पादकत्वमिति निश्चित्य पुनरपि सीतान्वेषणमारभते ।**

मन्दोदर्यामागतां सीताबुद्धित्वं युक्तिपर्यालोचनेन निराकृत्य हनुमान् सीतामन्विष्य पानभूमौ विचरितवान् । तत्रस्थासु पानद्रववशगासु रतिक्रीडाक्रान्तासु अनेकावस्थापन्नप्रसुप्तवराङ्गनासु अन्विष्य कथं सीतां – सीतां न प्राप्य सीता रावणेन मारिता वेति विशङ्क्य हनुमान् विषीदति । हनुमान् चिन्तयति किं वा कथयिष्यामि । समुद्रलङ्घनसदृशं न दृष्ट्वा वानराणां समीपे गमिष्यामि । तत्र वानरराजं सुग्रीवं दुष्करं कार्यं कृत्वापि यदि सीतादर्शनोपमसिद्धिं न प्राप्स्यामि तर्हि सर्वं विफलमेव । परन्तु औदासीन्यं न

उचितमेव । औदासीन्येन कार्यसिद्धिः न भविता । उद्यमेन हि कार्याणि सिद्ध्यन्ति । अतः औदासीन्यं गेनैव कार्यं साधनीयमस्ति । एवं विचिन्त्य हनुमान् पुनरपि उत्साहेन पराभूय मया सर्वथा उद्यो सीतामन्वेष्टुमारब्धवान् ।

--- **बोधप्रश्नः**

केन सीता मारिता स्यादिति हनुमान् शङ्कितवान् .1?

**दृष्ट्वा तस्याः विनाशमेव हेतुत्वेन पुष्पकविमानात् निवृत्य हनुमान् विद्युद्वेगेन सर्वत्रान्विष्यापि सीतां न उत्प्रेक्षते । सीतायाः अनुपलब्धिः रामे निवेदितानिवेदितापि अनेकमहानर्थापादिकेति विचिन्त्य प्रतिप्रयाणात् निवृत्तः प्रायोपवेशनं प्राणमोक्षणं रावणमारणं वेति किमुचितमिति तर्कयति कपिवरः ।**

मान् विद्युद्वेगेन सर्वत्रान्विष्यापि सीतां न दृष्ट्वा तस्याः विनाशमेव पुष्पकविमानात् निवृत्य हनु हेतुत्वेन उत्प्रेक्षते । सीतायाः अनुपलब्धिः रामे निवेदितानिवेदितापि अनेकमहानर्थापादिकेति विचिन्त्य ति तावत् प्रतिप्रयाणात् निवृत्तः प्रायोपवेशनं प्राणमोक्षणं रावणमारणं वेति यावत् हनुमान् चिन्तय अशोकवनिकां दृष्ट्वा तत्रैव सीता अन्वेषणीया इति निश्चिनोति । अत्र हनुमतः रामसेवकत्वेन युक्तिपर्यालोचनेन समुचितकार्यपन्थानिर्धारणञ्च सम्यक् ,सहृदयत्वेन कृपालुत्वं ,विचारविमर्शः उपस्थापितमस्ति ।

--- **बोधप्रश्नः**

तुं हनुमान् निश्चितवान्अन्ततः कस्मिन् वने सीतायाः अन्वेषणं क .1?

**अशोकवनिकायाः शोभावैभवम्**

अशोकवाटिकायां सीतायाः अन्वेषणं करिष्यामि इति हनुमान् चिन्तयित्वा अशोकवाटिकायाः प्राचीरस्य उपरि आगतवान् । अशोकवाटिकायाः प्राचीरोपरि उपविश्य महाकपिः हनुमान् वसन्तकालीनां अशोकवाटिकायाः शोभां दृष्टवान् । तत्र वसन्तस्य समागमात् वृक्षाः स्म । तत्र अशोकवाटिकायाम् विभिन्नाः वृक्षाः बहुललतया शोभन्ते स्म। फलपुष्पसमन्विताः दृश्यन्ते नागवृक्षान् च ,निम्बवृक्षान् ,चम्पकान् चूतान् ,सुपुष्पितान् ,अशोकान् ,यथा तत्र हनुमान् शालान् दृष्टवान् । ते सर्वे अपि वृक्षाः शतशतलताभिः आवेष्टिताः आसन् । सा विचित्रवाटिका मिश्र वृक्षराजिभिः परिशोभिता आसीत् । तेषु वृक्षेषु विभिन्नाः पक्षिणः कलरवं कुर्वन्ति स्वर्णाभिरजताभा स्म । अतः सा वाटिका मधुरगुञ्जनेन प्रतिध्वनिता भवति स्म । अशोकवाटिकायां प्रविश्य हनुमान् सा विभिन्नान् विहङ्गान् मृगसम्मूहान् च दृष्टवान् । फलपुष्पसमन्वितैः विभिन्नवृक्षराजिभिः अशोकवाटिका मत्तकपिलैः भ्रमरैश्च सेव्यते स्म । तस्यां वाटिकायाम् भ्रमणेन जनानां मनसि प्रसन्नता भवति स्म । तत्र मृगाः पक्षिणश्च मदमत्तो भवन्ति स्म । मत्तमयूराणां कलनादः तत्र निरन्तरं गुञ्जितो कवाटिकायां वानरवीरः हनुमान् भवति स्म । तत्र नानाजातीयाः पक्षिणः निवसन्ति स्म । तस्यां अशो विभिन्नप्रकारतया मनोरमभूमिसम्मूहान् दृष्टवान् । तानि भूमिस्थानानि मणिमण्डितानि रजतनिभानि स्वर्णजटितानि च आसन् । हनुमान् तत्र परमबारिपरिपूर्णाः वाप्यश्च विविधाकाराः दृष्टवान् । तत्र कताः आसन् । तत्र तटदेशेषु विभिन्नाः मणिमयसोपानानि आसन् । काः वाप्यश्च मुक्तप्रवालसि हंसाश्च शोभां वर्धयन्ति ,चक्रवाकयुगलं ,विचित्रसुवर्णमयवृक्षाः शोभन्ते स्म । तत्र प्रस्फुटितकमलवनं स्म । एवञ्च तत्र हंसानाम् सारसानाञ्च कलरवः श्रूयते स्म । तत्र चतुर्दिशि अमृतजलयुक्ताः तासां नदीनां तटदेशः अनेकानेकविशालवृक्षैः सुशोभितः सुखदायिन्यः सरिताः वहन्ति स्म । एवं आसीत् । तत्र तटदेशेषु शतशतलताकुञ्जाः विलसन्ति स्म । तत्र सर्वे अपि वृक्षाः फलपुष्पसमन्विताः आसन् । सर्वेपि वृक्षाः छत्रसदृशतया घनछायां प्रयछन्ति स्म । तेषां वृक्षाणामधः सुवर्णवेदिकाः

गेन प्रकम्पितान् किङ्किणीझङ्कृतान् वृक्षगणान् दृष्ट्वा हनुमान् विस्मितोभूत् । एवम् लक्ष्यन्ते स्म । वायुवे प्रकारेण अशोकवाटिकायां प्राकृतिकशोभां दृष्ट्वा हनुमान् चिन्तितवान् यत् सा तपस्विनी जनकनन्दिनी सीता अवश्यमत्र कथञ्चित् भवेत् एव ।

--- **बोधप्रश्नः**

भावैभवं वर्णितमस्तिअस्मिन् पाठे कस्य वनस्य शो .1?

**चैत्यप्रासादगतां यथावर्णितगुणावस्थोपलक्षितामेकां नारीं विलोक्य युक्तैर्बहुभिर्हेतुभिस्तस्याः सीतात्वं हनुमान् निर्धारितवान् ।**

हनुमान् अशोकवनिकां दृष्ट्वा तत्रैव सीता अन्वेषणीया इति निश्चिनोति । अशोकवनिकाप्राकारमवप्लुत्य वनरामणीयकं पश्यन् वृक्षाद्वृक्षमवप्लुत्य शाखाधुननेन पुष्पपर्णादीनि क्षपरिवृतं कञ्चिच्छिंशुपावृक्षं शातयन् सीतां विचिन्वानः हनुमान् मध्येवनं काञ्चनवेदिकामध्यवर्तिकाञ्चनवृ ददर्श । तत्र समीपे वहन्तीं सरितां दृष्ट्वा सन्ध्यावन्दनाय अवश्यमत्र सीता आगमिष्यतीति सम्भावयन् हनुमान् तस्मिन् शिंशुपावृक्षान्तराले लुक्कायितोतिष्ठत् । शिंशुपाग्रेवस्थाय सर्वतः दृष्टिं प्रसारयन् हनुमान् र्णितगुणावस्थोपलक्षितां तां विलोक्य युक्तैर्बहुभिर्हेतुभिस्तस्याः सीतात्वं चैत्यप्रासादगतां यथाव निर्धारितवान् ।

--- **बोधप्रश्नः**

अशोकवनिकायां कस्य वृक्षस्योपरि हनुमान् आरूढः आसीत् .1?

## सारांशः

श्रीमद्रामायणस्य सुन्दरकाण्डस्यास्मिन् तृतीयपाठ्यांशे मुख्यतया एते विषयाः आलोचिताः
सीता ,श्रीरामदूतो हनुमान् चित्रगृहनिकुञ्जादिनानास्थानेषु अन्विष्यापि सीतां न प्राप्य – सन्ति । तद्यथा नः सुग्रीवदर्शनादिषु निर्विर्णोपि रावणेन मारिता वेति विशङ्क्य विषीदति । स्वयत्नवैफल्यं मन्वा निर्वेदस्यानर्थापादकत्वं विचिन्त्य अनिर्वेदस्यैव फलोत्पादकत्वमिति निश्चित्य हनुमान् पुनरपि सीतान्वेषणमारभते । पुष्पकविमानात् निवृत्य हनुमान् विद्युद्वेगेन सर्वत्रान्विष्यापि सीतां न दृष्ट्वा तस्याः क्षते । सीतायाः अनुपलब्धिः रामे निवेदितानिवेदितापि अनेकमहानर्थापादिकेति विनाशमेव हेतुत्वेन उत्प्रे विचिन्त्य प्रतिप्रयाणात् निवृत्तः प्रायोपवेशनं प्राणमोक्षणं रावणमारणं वेति किमुचितमिति विचारितवान् दनु कपिवरः । तदनु अस्मिन् पाठ्यांशे विशेषतया अशोकवनिकायाः शोभावैभवम् वर्णितमस्ति । त अशोकवाटिकायामितस्थतः विचरन् हनुसान् चैत्यप्रासादगतां यथावर्णितगुणावस्थोपलक्षितामेकां नारीं विलोक्य युक्तैर्बहुभिर्हेतुभिस्तस्याः सीतात्वं निर्धारितवानिति एते विषयाः सारांशत्वेन अस्मिन् तृतीयपाठ्यांशे समुपलभ्यन्ते ।

## आदर्शप्रश्नाः

**—लघुत्तरीयप्रश्नाः**

मन्दोदर्यामागतां सीताबुद्धित्वं युक्तिपर्यालोचनेन हनुमान् कथं निराकृतवानिति यथाग्रन्थं लिखत । .1

जितेन्द्रियत्वेन हनुमान् परदारदर्शनदुरितं कथं निराकरोतीति लिखत । .2

पानशालायाः वर्णनं कुरुत । .3

**—विश्लेषणात्मकप्रश्नाः**

हनुमतः विषादकारणानि निर्णयत । .1

स्वयत्नवैफल्यं मन्वानः सुग्रीवदर्शनादिषु निर्विर्णोऽपि निर्वेदस्यानर्थापादकत्वं विचिन्त्य अनिर्वेदस्यैव .2

फलोत्पादकत्वमिति हनुमतः विचारमुद्दिश्य लिखत ।

**—निबन्धात्मकप्रश्नाः**

अशोकवनिकायाः शोभावैभवं वर्णयत । .1

मेकां नारीं विलोक्य युक्तैर्बहुभिर्हेतुभिस्तस्याः सीतात्वं चैत्यप्रासादगतां यथावर्णितगुणावस्थोपलक्षिता .2

कथं हनुमान् निर्धारितवानिति पर्यालोचयत ।

**—एकाङ्कप्रश्नाः**

श्रीरामचन्द्रस्य सखा वानरराजः कः। .1

हनुमान् कस्य दूतत्वेन सीतान्वेषणकार्यं कृतवान् । .2

। हनुमान् कस्य वानरराजस्य मन्त्री आसीत् .3

कति योजनविस्तीर्णं समुद्रं हनुमान् लङ्घितवान् । .4

रावणः सीतां कस्मिन् वने स्थापितवान् । .5

स्वर्णमयी नगरी का । .6

अशोकवनिकायां कस्य वृक्षस्योपरि हनुमान् आरूढः आसीत् । .7

सीतां न दृष्ट्वा हनुमतः मतिः कीदृशी भवति । .8

सीता कस्य राज्ञः कन्या आसीत् । .9

सीतायाः अपरं नास कथं वैदेही भवति । .10

सीतायाः अपरं नास कथं जानकी भवति । . .11

दशाननः इति कः । .12

**— उत्तराणि**

.7 लङ्कानगरी .6 अशोकवने .5 शतयोजनविस्तीर्णम् .4 सुग्रीवस्य .3 श्रीरामचन्द्रस्य .2 सुग्रीवः .1
जनकराजस्य .11 विदेहनगरस्य राजकन्याहेतोः .10 जनकराजस्य .9 विषादग्रस्ता .8 शिंशुपावृक्षस्योपरि
रावणः .12 कन्याहेतोः

# चतुर्थांशः

**—प्रस्थावना**

श्रीमद्रामायणस्य सुन्दरकाण्डस्यास्मिन् चतुर्थांशे पाठ्यविषये मुख्यतया एते विषयाः अशोकवनिकाप्राकारमवप्लुत्य वनरामणीयकं पश्यन् वृक्षाद्वृक्षमवप्लुत्य --वर्णिताः सन्ति । तद्यथा मितस्ततः भ्रमन् शाखाधुननेन पुष्पपर्णादीनि शातयन् सीतां विचिन्वानः तत्र अशोकवाटिकाया वानरशिरोमणिः हनुमान् एकं सुन्दरं रमणीयं चैत्यप्रासादं दृष्टवान् । तदनु तस्मिन् चैत्यप्रासादे हनुमान् एकां राक्षसीभिः परिवेष्टितां असाधारणसुन्दरीं तरुणीं दृष्टवान् । सा उपवासहेतोः अत्यन्तदुर्बला हीना ण तस्याः शरीरम् आच्छादितमासीत् । सा मलिना च दृश्यते स्म । एकेनैव पीतेन कार्पासवस्त्रे अलङ्कारशून्या आसीत् इति हेतोः कमलरहितपुष्करिणी इव श्रीहीना लगति स्म । सा तपस्विनी मङ्गलग्रहेण आक्रान्ता रोहिणी इव शोकपीडिता दुःखसन्तप्ता तथा सर्वथा क्षीणकाया च भवति स्म । र्यः मुखोपरि अश्रुधारा वहति स्म । सा शोकेन चिन्तामग्ना उपवासेन दुर्बलायाः दुःखितायाश्च तस्याः ना निरन्तरं दुःखमग्ना च तिष्ठति स्म । सा नारी प्रियजनं तु द्रष्टुं न पारयति अपि तु तस्याः दृष्टिसम्मुखे सा सुखभोगाय योग्या आसीत् । परन्तु दुःखसन्तप्ता भवति सर्वदा राक्षसीगणाः उपविष्टाः आसन् । लनेत्रयुक्तां अत्यन्तमलिनां क्षीणकायामबलां दृष्ट्वा युक्तियुक्तकारणद्वारा हनुमान् स्म। तां विशा अनुमितवान् यत् एषा एव सा सीता भवेदिति । सा अत्यन्तसुन्दरी सीता विस्तृतशोकजालेन भूतले ,आच्छादिता आसीत् इति हेतोः विशेषशोभां न प्राप्नोति स्म । सा सन्दिग्धार्थयुक्ता स्मृतिरिव मिथ्याकलङ्केन कलङ्किता ,कलुषिता बुद्धिरिव ,विघ्नयुक्ता रिद्धि इव ,भग्ना आशा इव ,पतिता सिद्धिरिव कीर्त्तिरिव च लक्ष्यते स्म । राक्षसीपीडिता सा सीता मृगशावकनयना अबला असहाया इव इतस्ततः स्म । सा वारम्बारं पश्यति स्म । तस्याः मुखं प्रसन्नं नासीत् । तस्यां मुखोपरि अश्रुधारा वहति दीर्घश्वासं नयति स्म । तस्याः शरीरोपरि मालिन्यं तिष्ठति स्म । सा दीनकाया मूर्त्तिरिव लगति स्म ।

अतः कृष्णमेघच्छायाच्छादिता चन्द्रप्रभा इव लक्ष्यते स्म । अनभ्यासात् विस्मृतां विद्यामिव क्षीणां सीतां

त् । अलङ्कारस्नानानुलेपनादिभिः अङ्गसंस्कारैः रहिता सीता दृष्ट्वा हनुमतः बुद्धिः संशयग्रस्ता अभू

व्याकरणादिजनितसंस्कारैः शून्या अर्थान्तरप्राप्ता वाणी इव लक्ष्यते स्म । अतः हनुमान् बहुकष्टेन तां

सीतामिति ज्ञातवान् ।

द्रष्टुम् रात्रेः अन्तिमप्रहरे सः मदमत्तः निशाचरः रावणः कामतप्तो भूत्वा सीतां तदनु

अशोकवाटिकां प्रति आगतवान् । सर्वाभूषणादिभिः भूषितः उत्तमशोभासम्पन्नः स रावणः

अशोकवाटिकां प्रविष्टवान् । रावणस्य पृष्ठतः शतसंख्यकाः सुन्दर्यः रमण्यः चलन्ति स्म । यथा

यः देवराजस्य इन्द्रस्य पृष्ठतः देवस्त्रियः गन्धर्वस्त्रियः चलन्ति स्म । ताः सर्वाः स्त्रि

विभिन्नरत्नालङ्कारादिभिः सुसज्जिताः सुवस्त्रसुगन्धादिभिः मण्डिताश्च अपूर्वशोभाधारिण्यः आसन्।

रावणः कामदर्पमदयुक्तः धनुषरहितः साक्षात् कामदेव इव दृश्यते स्म । तस्य वस्त्रं दुग्धफेनमिव श्वेतं

एतादृशं सुसज्जितं तत्र आगछन्तं निर्मलम् उत्तमञ्च आसीत् । अशोकवाटिकायाम् वृक्षारूढः हनुमान्

रावणं दृष्टवान् । नक्षत्रादिभिः परिवृतः चन्द्र इव परमसुन्दरयुवतीभिः परिवेष्टितः महातेजस्वी रावणः

अशोकवाटिकायां प्रविष्टवान् । तदनु रावणः असितकेशयुतां सुश्रोणीं संघस्तनीं सीतां द्रष्टुं तस्याः

षितं रूपयौवनसम्पन्नं राक्षसराजं रावणमागछन्तं दृष्ट्वा सीता समीपे आगतवान् । आभूषणादिभिः विभू

कदलीपत्रमिव भयेन कम्पिता अभूत् । सुन्दरी विशाललोचना जानकी उरूभ्याम् उदरं बाहुभ्याञ्च

पयोधरौ आच्छाद्य दृढतया उपविष्टा अभूत् । पतिवियोगशोकहेतोः सीतायाः हृदयं आकुलितमासीत्।

नी नारी इव लगति स्म । उपवासहेतोः शोकचिन्ताकारणात् च सा सीता सा दीना जीर्णा शीर्णा दुःखि

भयेन अत्यन्तक्षीणा कृशकाया दीना च लगति स्म । तथापि सा विशाललोचना सती साध्वी

मिथिलेशकुमारी सीता श्रीरामचन्द्रे अत्यन्तम् अनुरक्ता भूत्वा इतस्ततः पश्यति स्म।

सराजः रावणः कालवशगः भूत्वा तां सीतां विभिन्नोपायेन एतादृश्यामवस्थायां सीतां दृष्ट्वा राक्ष

प्रलोभयितुं चेष्टितवान् । राक्षसीभिः परिवृतां दीनां आनन्दशून्यां तपस्विनीं सीतां सम्बोधयन् रावणः

हे - मधुरवचनैः स्वाभिप्राययुक्तं निजमनोभावं प्रकटयितुमारब्धवान् । रावणः सीतां कथयति यत् ष्ट्वा एव किमर्थं भवती आत्मानं भयेन आवृणोति । किमर्थं मां दृष्ट्वा भवती अत्यन्तं मां दृ !सुन्दरि सीते भयभीता भवति । परन्तु अहं भवतीं कथयामि यत् अहं त्वयि स्निह्यामि । अतः सर्वाङ्गसुन्दरि प्रिये सीते !समस्तसंसारमोहकारिणि!भवती अपि माम् आदरेण स्वीकरोतु । मम तुप्रार्थनाञ्च अङ्गीकरो । अत्र भवत्याः कृते किमपि भयं नास्ति । मम सकाशादपि अपि तव भयं न भवेत्। भवती न चिन्तयतु यत् अहम् अधर्मं कृतवान् इति । परस्त्रीगमनं बलात् च अपहरणं राक्षसानां सदैव स्वधर्मो भवतीति अत्र संशयः नास्ति । एवम् च यावत् पर्यन्तं भवति मां न इच्छति तावत् मयि विश्वासं कृत्वा यथार्थरूपेण मम !अहं भवतीं न स्पृशामि एव । अतः भयं न करोतु प्रिये पर्यन्तम् मां प्राप्य भवती सर्वाणि !कृते प्रेमदानं करोतु एवञ्च शोके न व्याकुलिता भवतु । मिथिलेशकुमारि तानि विविधानि उपभोग्यानि वस्तूनि प्राप्स्यति । यथा विचित्राणि माल्यानि चन्दनानि अगुरूणि सुगन्धि गीतं नृत्यं वाद्यञ्च सर्वाणि ,सुवस्त्राणि दिव्यानि आभरणानि महार्हाणि पानानि शयनानि आसनानि उपभोग्यानि वस्तूनि मां प्राप्य भवती प्राप्नोतु इति निवेदयामि ।

एवम्प्रकारेण राक्षसराजः रावणः विभिन्नप्रलोभनेन उपायेन च सतीं साध्वीं सीतां स्वस्मिन् र्षयितुं बहु चेष्टितवान् । परन्तु पतिपरायणा सती साध्वी सीता श्रीरामचन्द्रे एव स्वमनः संस्थाप्य आक तपस्विनी इव तत्र अशोकवाटिकायामतिष्ठत् । एवम् प्रकारेण सुन्दराकाण्डे अस्सिन् पाठ्यांशे एते विषयाः उपन्यस्ताः सन्ति ।

## -- उद्देश्यम्

स्य प्रस्तुतपाठे वयं निम्नलिखितान् विन्दून् आलोचयिष्यामः ।प्रियपाठकाः सुन्दरकाण्ड

**अशोकवनस्थितायाः रामविरहितायाः सीतायाः विभिन्नदृष्टान्तच्छलेन वर्णनम् ।** .1

**रात्रेः अन्तिमप्रहरे सर्वाभूषणभूषितस्य उत्तमशोभासम्पन्नस्य मदमत्तनिशाचररावणस्य कामतप्तो .2**

**भूत्वा सीतां द्रष्टुम् अशोकवाटिकां प्रति आगमनम् ।**

**सर्वाभूषणभूषितस्य उत्तमशोभासम्पन्नस्य कामतप्तस्य मदमत्तनिशाचररावणस्य अशोकवाटिकां प्रति .3**

**आगमनमुपलक्ष्य सीता भयान्विता भवति ।**

**रं प्रार्थयते ।विभिन्नचाटुवचनोपन्यासैः सीतां प्रलोभयन् रावणः प्ररोचनपूर्वं स्वाङ्गीका .4**

**अशोकवनस्थितायाः रामविरहितायाः सीतायाः विभिन्नदृष्टान्तच्छलेन वर्णनम् ।**

अशोकवाटिकायाम् इतस्ततः भ्रमन् वानरशिरोमणिः हनुमान् एकं सुन्दरं रमणीयं चैत्यप्रासादं तां असाधारणसुन्दरीं तरुणीं दृष्टवान् । तदनु तस्मिन् चैत्यप्रासादे हनुमान् एकां राक्षसीभिः परिवेष्टि दृष्टवान् । सा उपवासहेतोः अत्यन्तदुर्बला हीना च दृश्यते स्म । एकेनैव पीतेन कार्पासवस्त्रेण तस्याः शरीरम् आच्छादितमासीत् । सा मलिना अलङ्कारशून्या आसीत् इति हेतोः कमलरहितपुष्करिणी इव न्ता रोहिणी इव शोकपीडिता दुःखसन्तप्ता तथा श्रीहीना लगति स्म । सा तपस्विनी मङ्गलग्रहेण आक्रा सर्वथा क्षीणकाया च भवति स्म । उपवासेन दुर्बलायाः दुःखितायाश्च तस्याः नार्यः मुखोपरि अश्रुधारा वहति स्म । सा शोकेन चिन्तामग्ना निरन्तरं दुःखमग्ना च तिष्ठति स्म । सा नारी प्रियजनं तु द्रष्टुं न सा सुखभोगाय योग्या  दृष्टिसम्मुखे सर्वदा राक्षसीगणाः उपविष्टाः आसन् । पारयति अपि तु तस्याः आसीत् । परन्तु दुःखसन्तप्ता भवति स्म । तां विशालनेत्रयुक्तां अत्यन्तमलिनां क्षीणकायामबलां दृष्ट्वा सीता  युक्तियुक्तकारणद्वारा हनुमान् अनुमितवान् यत् एषा एव सा सीता भवेदिति । सा अत्यन्तसुन्दरी विस्तृतशोकजालेन आच्छादिता आसीत् इति हेतोः विशेषशोभां न प्राप्नोति स्म । सा सन्दिग्धार्थयुक्ता ,कलुषिता बुद्धिरिव ,विघ्नयुक्ता रिद्धि इव ,भग्ना आशा इव ,भूतले पतिता सिद्धिरिव ,स्मृतिरिव सा सीता मृगशावकनयना अबला  मिथ्याकलङ्केन कलङ्किता कीर्त्तिरिव च लक्ष्यते स्म । राक्षसीपीडिता

असहाया इव इतस्ततः पश्यति स्म। तस्याः मुखं प्रसन्नं नासीत् । तस्यां मुखोपरि अश्रुधारा वहति स्म । सा वारम्बारं दीर्घश्वासं नयति स्म । तस्याः शरीरोपरि मालिन्यं तिष्ठति स्म । सा दीनकाया मूर्त्तिरिव चन्द्रप्रभा इव लक्ष्यते स्म । अनभ्यासात् विस्मृतां लगति स्म । अतः कृष्णमेघच्छायाच्छादिता विद्यामिव क्षीणां सीतां दृष्ट्वा हनुमतः बुद्धिः संशयग्रस्ता अभूत् । अलङ्कारस्नानानुलेपनादिभिः अङ्गसंस्कारैः रहिता सीता व्याकरणादिजनितसंस्कारैः शून्या अर्थान्तरप्राप्ता वाणी इव लक्ष्यते स्म ।

**बोधप्रश्नः**

हनुमान् एकं चैत्यप्रासादं कुत्र दृष्टवान् .1?

2. ? सीता किं वस्त्रं धृतवती आसीत्

**रात्रेः अन्तिमप्रहरे सर्वाभूषणभूषितस्य उत्तमशोभासम्पन्नस्य मदमत्तनिशाचररावणस्य कामतप्तो भूत्वा सीतां द्रष्टुम् अशोकवाटिकां प्रति आगमनम् ।**

रात्रेः अन्तिमप्रहरे सः मदमत्तः निशाचरः रावणः कामतप्तो भूत्वा सीतां द्रष्टुम् अशोकवाटिकां प्रति आगतवान् । सर्वाभूषणादिभिः भूषितः उत्तमशोभासम्पन्नः स रावणः अशोकवाटिकां प्रविष्टवान् । रावणस्य पृष्ठतः शतसंख्यकाः सुन्दर्यः रमण्यः चलन्ति स्म । यथा स्य पृष्ठतः देवस्त्रियः गन्धर्वस्त्रियः चलन्ति स्म । ताः सर्वाः स्त्रियः देवराजस्य इन्द्र विभिन्नरत्नालङ्कारादिभिः सुसज्जिताः सुवस्त्रसुगन्धादिभिः मण्डिताश्च अपूर्वशोभाधारिण्यः आसन्। व श्वेतं रावणः कामदर्पमदयुक्तः धनुषरहितः साक्षात् कामदेव इव दृश्यते स्म । तस्य वस्त्रं दुग्धफेनमि

निर्मलम् उत्तमञ्च आसीत् । अशोकवाटिकायाम् वृक्षारूढः हनुमान् एतादृशं सुसज्जितं तत्र आगछन्तं रावणं दृष्टवान् । नक्षत्रादिभिः परिवृतः चन्द्र इव परमसुन्दरयुवतीभिः परिवेष्टितः महातेजस्वी रावणः अशोकवाटिकायां प्रविष्टवान् ।

--- **बोधप्रश्नः**

.1 रात्रेः कस्मिन् प्रहरे सः मदमत्तः निशाचरः रावणः कामतप्तो भूत्वा सीतां द्रष्टुम् अशोकवाटिकां प्रति आगतवान् ?

**सर्वाभूषणभूषितस्य उत्तमशोभासम्पन्नस्य कामतप्तस्य मदमत्तनिशाचररावणस्य अशोकवाटिकां प्रति**

**ति ।आगमनमुपलक्ष्य सीता भयान्विता भव**

आभूषणादिभिः विभूषितं रूपयौवनसम्पन्नं राक्षसराजं रावणमागछन्तं दृष्ट्वा सीता कदलीपत्रमिव भयेन कम्पिता अभूत् । सुन्दरी विशाललोचना जानकी उरूभ्याम् उदरं बाहुभ्याञ्च सीत्। पयोधरौ आच्छाद्य दृढतया उपविष्टा अभूत् । पतिवियोगशोकहेतोः सीतायाः हृदयं आकुलितमा सा दीना जीर्णा शीर्णा दुःखिनी नारी इव लगति स्म । उपवासहेतोः शोकचिन्ताकारणात् च सा सीता भयेन अत्यन्तक्षीणा कृशकाया दीना च लगति स्म । तथापि सा विशाललोचना सती साध्वी मिथिलेशकुमारी सीता श्रीरामचन्द्रे अत्यन्तम् अनुरक्ता भूत्वा इतस्ततः पश्यति स्म। मवस्थायां राक्षसीभिः परिवृतां दीनां आनन्दशून्यां तपस्विनीं सीतां दृष्ट्वा राक्षसराजः रावणः एतादृश्या कालवशगः भूत्वा तां सीतां विभिन्नोपायेन प्रलोभयितुं चेष्टितवान् ।

--- **बोधप्रश्नः**

अशोकवने सीता काभिः परिवृता आसीत् .1?

**विभिन्नचाटुवचनोपन्यासैः सीतां प्रलोभयन् रावणः प्ररोचनपूर्वं स्वाङ्गीकारं प्रार्थयते ।**

अशोकवने भयविह्वलितां सीतां दृष्ट्वा राक्षसराजः रावणः कालवशगः भूत्वा तां विभिन्नोपायेन सम्बोधयन् रावणः प्रलोभयितुं चेष्टितवान् । राक्षसीभिः परिवृतां दीनां आनन्दशून्यां तपस्विनीं सीतां हे - मधुरवचनैः स्वाभिप्राययुक्तं निजमनोभावं प्रकटयितुमारब्धवान् । रावणः सीतां कथयति यत् मां दृष्ट्वा एव किमर्थं भवती आत्मानं भयेन आवृणोति । किमर्थं मां दृष्ट्वा भवती अत्यन्तं !सुन्दरि सीते स्निह्यामि । अतः भयभीता भवति । परन्तु अहं भवतीं कथयामि यत् अहं त्वयि सर्वाङ्गसुन्दरि प्रिये सीते !समस्तसंसारमोहकारिणि!भवती अपि माम् आदरेण स्वीकरोतु । मम प्रार्थनाञ्च अङ्गीकरोतु । अत्र भवत्याः कृते किमपि भयं नास्ति । मम सकाशादपि अपि तव भयं न भवेत्। भवती न चिन्तयतु यत् अहम् अधर्मं कृतवान् इति बलात् च अपहरणं राक्षसानां । परस्त्रीगमनं सदैव स्वधर्मो भवतीति अत्र संशयः नास्ति । एवम् च यावत् पर्यन्तं भवती मां न इच्छति तावत् मयि विश्वासं कृत्वा यथार्थरूपेण मम !पर्यन्तम् अहं भवतीं न स्पृशामि एव । अतः भयं न करोतु प्रिये मां प्राप्य भवती सर्वाणि !वतु । मिथिलेशकुमारिकृते प्रेमदानं करोतु एवञ्च शोके न व्याकुलिता भ उपभोग्यानि वस्तूनि प्राप्स्यति । यथा विचित्राणि माल्यानि चन्दनानि अगुरूणि सुगन्धितानि विविधानि गीतं नृत्यं वाद्यञ्च सर्वाणि ,सुवस्त्राणि दिव्यानि आभरणानि महार्हाणि पानानि शयनानि आसनानि प्य भवती प्राप्नोतु इति निवेदयामि ।उपभोग्यानि वस्तूनि मां प्रा

एवम् प्रकारेण राक्षसराजः रावणः विभिन्नप्रलोभनेन उपायेन च सतीं साध्वीं सीतां स्वस्मिन् आकर्षयितुं बहु चेष्टितवान् । परन्तु पतिपरायणा सती साध्वी सीता श्रीरामचन्द्रे एव स्वमनः संस्थाप्य त् ।तपस्विनी इव तत्र अशोकवाटिकायामतिष्ठ

**--- बोधप्रश्नः**

पतिपरायणा सती साध्वी सीता कस्मिन् एव स्वमनः संस्थाप्य तपस्विनी इव तत्र .1

अशोकवाटिकायामतिष्ठत् ?

## सारांशः

श्रीमद्रामायणस्य सुन्दरकाण्डस्यास्मिन् चतुर्थांशे पाठ्यविषये मुख्यतया एते विषयाः वर्णिताः अशोकवनस्थितायाः रामविरहितायाः सीतायाः विभिन्नदृष्टान्तच्छलेन वर्णनम् । --सन्ति । तद्यथा निशाचररावणस्य कामतप्तो भूत्वा रात्रेः अन्तिमप्रहरे सर्वाभूषणभूषितस्य उत्तमशोभासम्पन्नस्य मदमत्त सीतां द्रष्टुम् अशोकवाटिकां प्रति आगमनम् । सर्वाभूषणभूषितस्य उत्तमशोभासम्पन्नस्य कामतप्तस्य

मदमत्तनिशाचररावणस्य अशोकवाटिकां प्रति आगमनमुपलक्ष्य सीता भयान्विता भवति । तदनु तत्र भयन् रावणः प्ररोचनपूर्वं स्वाङ्गीकारं प्रार्थयते इति भयविह्वलितां सीतां विभिन्नचाटुवचनोपन्यासैः प्रलो एते विषयाः अत्र चतुर्थांशस्य सारांशत्वेन विज्ञेयाः भवन्ति ।

# आदर्शप्रश्नाः

**—लघुत्तरीयप्रश्नाः**

सीतायाः पतिपरायणतामाविष्कुरुत । .1

सीतायाः शोककारणानि लिखत । .2

चैत्यप्रासादमुपलक्ष्य लिखत । .3

**—श्नाःविश्लेषणात्मकप्र**

रावणस्य शोभां वर्णयत । .1

भयविह्वलितायाः सीतायाः विषये लिखत । .2

**—निबन्धात्मकप्रश्नाः**

रामविरहितायाः सीतायाः दुरवस्थां कविवर्णितविभिन्नदृष्टान्तच्छलेन लिखत । .1

विभिन्नचाटुवचनोपन्यासैः सीतां प्रलोभयन् रावणः कथं सीतायाः प्रेम वाञ्छतीति वर्णयत । .2

**—एकाङ्कप्रश्नाः**

मिथिलेशकुमारी का । .1

रामायणदिशा मिथिलानरेशस्य नाम किम् । .2

हनुमान् चैत्यप्रासादं कुत्र दृष्टवान् । .3

रात्रेः कस्मिन् प्रहरे रावणः सीतां द्रष्टुम् अशोकवाटिकामागतवान् । .4

रावणं परितः काः चलन्ति स्म । .5

रावणः कस्य सदृशः दृश्यते स्म । उत्तमशोभासम्पन्नः धनुषरहितः .6

सीतायाः मनः कस्मिन् लग्नमासीत् । .7

अशोकवने मृगशावकनयना का । .8

रावणः सीतायाः किमिच्छति स्म । .9

सीता किं वस्त्रं धृतवती आसीत् । .10

रावणवस्त्रस्य रङ्गः कीदृशः आसीत् । .11

अशोकवाटिकायां तपस्विनी इव का कालं यापयति स्म । .12

**— त्तराणिउ**

.8 श्रीरामचन्द्रे .7 कामदेवः इव .6 वराङ्गनाः .5 अन्तिमप्रहरे .4 अशोकवने .3 जनकः .2 सीता .1
सीता .12 श्वेतवर्णः .11 कार्पासवस्त्रम् .10 मनः .9 सीता

-------- ओम् शान्तिः शान्तिः शान्तिः ओम् --------